कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

पं. ८.१८

२१५

॥ आग्रयणःप्रयोगस्येदं पुस्तकं गोविंदपंतवैद्यस्य ॥ १८

Acc. No:- ~~410~~ M1016.

Title:- आग्रयण प्रयोग

Subject:- Ritual

पत्रे:- ⑦

①

KKSU LIBRARY
RAMTEK
441 106
M1016
Dist Nagpur

Checked 2012

हरणकाले तत्सहितं त्रयं ॥ विंशती
तिथ्योः संसरामीत्यूहः ४

१॥ श्रीगणेशाय नमः ॥ आग्रयणस्य कर्म आग्रयणमिति कर्मनामधेयं ॥ शरत्काले अमावास्यायां पौ- मां४
र्णमास्यां वा प्रातरग्निहोत्रं हुत्वा प्राणानायम्य पत्नीमितः सह आग्रयणेन यक्ष्ये स्वर्गं लोकमय
प्रवानीति संकल्प्य ॥ विघृतासि. । अधपत्नीय. इमामूर्जयथातिथि. । आग्रयणीयच्छु हविरिदन्ते ॥
अत्र साधारणदेवतानां इन्द्राग्न्योर्मुख्यत्वादमावास्यातंत्रं ॥ अन्वाधाय व्रतग्रहणः संदर्श
साभिध्येन्मः ॥ वेदं कृत्वा वेदिः ॥ यस्य कस्यचित्काष्ठस्योपवेषं मंत्रेण करोति ॥ अलंकृत्य परिस्तर
णं देवा देवेषु. ॥ पात्रप्रयोगकाले एकविंशति कपालानि स्थाल्यौ स्फ्यश्च द्वंद्वं ॥ अग्निहोत्रहवणी
शूर्पपवित्रयं द्वंद्वं ॥ कृष्णहकत्रयपुरोडाशपात्र्या सह वेदं प्रणीताप्रणयनेन सह होत्रसवनपात्रं ॥ अन्वाहा
र्यस्थाली वर्ज्यमितराणि सर्वाणि प्रकृतिवत् ॥ पवित्रकरणादि ~~[illegible]~~ तं कृत्वा ॥
कृष्णहकत्रयपुरोडाशपात्रमेकस्यां पात्र्यां सर्वाणि वीजानि समोप्य सर्वेभ्यः एकनिर्वापः ॥ तान
स्पस्यासि द्धाप्यत्वा ॥ वेषाय त्वा ॥ शूर्पाणि ॥ प्रत्युष्टमित्यादि मंत्रस्यावसंतं ॥ निरस्तमिति
सर्वेभ्यो हविर्भ्यस्तं मंत्रेण निरसनाभिमंत्रणे कृत्वा । देवस्य त्वेत्यादि. अग्नये जुष्टं निर्वपामि इत्या
ग्नेयं पुरोडाशं व्रीहिभिर्निरूप्य ॥ अन्यस्मिन् शूर्पे पवित्रे निधाय इंद्राग्निभ्यां जुष्टं निर्वपामि. ति १॥

४ संविंशंतां दैव

Checked 2012

भ्यो देवेभ्यो जुष्टमिति नवानां निर्वापः । अथान्यस्मिन् शूर्पे पवित्रे निधाय सोमाय जुष्टमीति
श्यामाकानां निर्वापः । पुनश्च नवानां शूर्पे पवित्रे निधाय द्यावापृथिवीभ्यां जुष्टमिति नवानां
निर्वापः ॥ त्रिर्यजुषा तूष्णीं चतुर्थमित्यादि उर्वंतरिक्षमित्यंतं ॥ अदित्यास्त्वोपस्थे सादयाम्यग्ने
हव्यं रक्षस्वेंद्राग्नी हव्यं रक्षेथां विश्वेदेवा हव्यं रक्षध्वं सोम हव्यं रक्षस्व द्यावापृथिवी
हव्यं रक्षेथामित्युपसादनं ॥ सत्रकायामित्यादि· रन्तूर्येपोक्षितास्थ इत्यंतं कृत्वा आ
ज्याहुतीर्जुहोति । लौकिकाज्यं जुहूमानीय ॥ शतायुधाय शतवीर्याय शतोतयेऽभिमाति
षाहे । शतं यो नः शरदो अजीतानिंद्रो नेषदति दुरितानि विश्वा स्वाहा ॥ इंद्रायेदं । ये चत्वारः
पथयो देवयानानंतरा द्यावापृथिवी । वियंति । तेषां यो अज्यानिमजीतिमावहात्तस्मै नो
देवाः परिदत्तेह सर्वे स्वाहा । देवेभ्य इदं ॥ ग्रीष्मो हेमंत उत नो वसंतः शरद्वर्षाः सुवितं नो अस्तु ।
तेषामृतूनां शतशारदानां निवात एषामभये स्याम स्वाहा । ग्रीष्महेमंतशरद्वर्षाभ्य इदं ।
इदुवत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः । तेषां वयं सुमतौ यज्ञियानां
ज्योगजीता अहतास्याम स्वाहा । इदुवत्सर परिवत्सर संवत्सरेभ्य इदं ॥ भद्रान्नः श्रेयः सम

वहननमेप्रोष्याववर्त्तयते:५

॥२॥ नैष्ट देवा स्वपावृसेन समेशीमहि स्वा॥ स नो मयोभूः पितो आविश स्वचंरां तोकाय तनुवे स्वा
नः स्वाहा॥ विश्वेभ्यो देवेभ्यश्च इदं [illegible] अग्नये प्रोक्षामीत्यादि। अग्नये वो जुष्टं प्रोक्षामी इन्द्रा
ग्निभ्यां वो जुष्टं प्रोक्षामि विश्वेभ्यो देवेभ्यो वो जुष्टं प्रोक्षामि सोमाय वो जुष्टं प्रोक्षामि द्यावा पुराणानं
पृथिवीभ्यां वो जुष्टं प्रोक्षामि इति प्रोक्षणं॥ कृष्णाजिनादानादितंडु [illegible] प्रस्कन्दनातं स्व
सा॥ नवानामपि आग्नीध्रप्रैषवर्जं तथैव करोति॥ श्यामाकानामप्येवमेव॥ आदावे
वारम घातोन प्रसाचक्ति॥ अदृध्येन वध्य इति तन्त्रेण फलीकरणं॥ देवेभ्यः शुं
धध्वमिति क्रमेण फलीकरणं॥ पर्यायेण प्रक्षालनं संसृज्यते त्रेण निनयनं तुष्करे॥
यथाभागं व्यावर्तध्वमिति विभागः॥ इदमिन्द्राग्न्योरिदं द्यावापृथिव्योरिति पेषणार्थी रे।
इदं विश्वेषां देवानामिति च वर्धयन्॥ कृष्णाजिनादानादि अणन्नि कुरुतादित्यंतं समाग्नेयस्य
कृत्वा पुनर्नवानां कृष्णाजिनादानादि करोति॥ इन्द्राग्निभ्यां जुष्टमप्यावपामि द्यावापृथिवी
जुष्ट २ भ्यामप्यावपामि इत्यन्यत्॥ अणन्नि कुरुतादित्यंतं कृत्वा फलीकरणं पिष्टके पंच प्रशतानि ख्याय॥
धिविरसी इत्यादि आग्नेयस्याष्टाकपालाय ऐन्द्राग्नस्याष्टाकपालाय इमं चत्वारि॥ विश्वेदेव ॥२॥

भृगूणामंगिरसांतपसातप्यस्वेत्येककपाले विशेषः = २

x सौम्यस्थाल्यामा x ५

सौम्यस्थाल्यो ध्रुवोसीति क्रमेणोधायपवानापधिष्येककपालं ध्रुवमसीत्युपधायामदंती
रधिश्रयति ॥ प्रक्षालितायां पात्र्यां ॥ अग्नये जुष्टं संवपामीत्येकास्मिन् गृहके पुराणसंतापः ।
इंद्राग्निभ्यां जुष्टं संवपामि द्यावापृथिवीभ्यां जुष्टं संवपामीति नवानां संतापः ॥ जीर्णपिष्टा
न्युप्य नवापिष्टान्युप्य तंडुलानुत्पुनाति । देवस्त्वा सवितोत्पुनात्विति पयउ सपयस्थाल्या
मासिंचति । अपश्चोत्सृपासिंचति । समापो अद्भिरित्यादि मखस्य शिरोसी सोग्नेयस्यापि
ङूलस्यापुनर्नयानां तथैव सत्वा यथाभागं व्यावर्तेथामिदमिंद्राग्न्योरिदं द्यावापृथिव्योरि
त्याभिमृशति । इदमहं सेना । आग्नेयमाधिश्रित्यैंद्राग्नमाधिश्रयति । अथो सृतापय आ
नीतायां वैश्वदेवस्थाल्यां तंडुलान्न घर्मोसीत्यावपति । अथो सृताप आनीतायां सौम्यस्था
ल्यां श्यामाकानावपति । अथैककपालमाधिश्रयति ॥ ऊरु प्रथस्वोरु ते इत्यादि त्रितायेद
भिसंतं कृत्वा ॥ ब्रह्मन्नुत्तरं परिग्राहमित्यादि आप्यायतां घृतयोनिरित्यंतं आग्नेयमभिघा
र्य तूष्णीमितरानप्यासुद्यावापति स्योनं त इत्यादिना पुरोडाशद्वयमुद्वास्य ओहे भुवनस्पति
चरुद्वयस्योद्वासनं कृत्वैककपालमुद्वासयति ॥ अलंकरणकाले देवस्य त्वा सवितासप्था

= प्रथनादि पुरोडाशानामंतरितं सर्वेषां ५

सल्लतः२ =अग्निनायशः सौमिनयशः इत्याज्यभागयोरनुमंत्रणे ॥आ
लायनानां अग्नेस्तस्त्रैः ॥ अन्यानिह वांष्युपांशु ॥=२

॥३॥

न ह्लिकिति मंत्रेणाज्येनैककपालमभिपूरयति । आविः पृष्ठं राकृत्वा ॥ अंत्येण नाम्ना अंत्यं स
द आसीदेसीसादयति । पञ्चोसि सर्वतः । अयं यज्ञः सम । योनाः कनीय । अपतमिंद्राग्नी भु
वनान्नुदेतामिसेद्राग्नं । ममाग्ने पंच होते त्यासन्नाति मर्शनं । होतरे हीसादि पंच हो
तारं वदस्पुरस्तादु विरवदानस्येसंतं ॥ आग्नेये न प्रचर्य ॥ इंद्राग्निभ्यामनुब्रुहीत्यादि एवं वत्
विश्वेभ्यो देवेभ्योनुब्रूहि । विश्वान्देवान्यज । विश्वेषां देवानामहं देवयज्ययाप्राणैः
सायुज्यं गमेयं ॥ सोमायानु । सोमं यज । सोमयेदं । सोमस्याहं देवयज्ययाव्रहा । द्यावा
पृथिवीभ्यामनु । द्यावापृथिवी यज । द्यावापृथिवीभ्यामिदं । द्यावापृथिव्योरहं देव
यज्यया । सयोः कपोः र्ध्यासं ॥ एककपालमुद्धस बर्हिषि सस्त्वापयिचासो कर्पा
थैरि शिक्यं स्तसुताः स्मिन्निधाय जुह्वां शिक्यनसहस्रतिष्ठाप्य अभिघार्य राज्य
जुह्वामानीय द्यावापृथिवीभ्यामित्युपांशु । हका अनुब्रूहीसप्रैषैः । एवंस्रतिष्ठितो हो
तव्यः । यदि कुतःपर्याव्रर्तेत स्त्रुचोग्रेण कंपयन् सर्वसा पाभ्योतेभ्यः । नात्रवेदस्तबोद्यागः ।
नात्रैककपालक्ष्यमविश्वदेवो कोः ॥ न पार्वणहोमः ॥ नारिष्टादि प्राशित्र मार्जनांतं ॥

॥३॥

⑥

दक्षि ७ अ॰ ... न्यत वरूत्रय स्या वय पूषसोमाय वासः॥

इडावदानकाले श्यामाकं यजमानभागं पृथक् ध्रुवायामुपोहति॥ दक्षिणादानकाल
पर्यंतं कृत्वा॥ अथ नववस्त्रवाससी अंतर्वेदि स्थापयित्वा ब्रह्माणिमंत्रणांतं कृत्वा॥ ब्रह्म
पिन्वस्व॰ प्रजापतेर्भागो॥ सस्त्रध्यारे उरसे अक्षीयमाणे तद अनु पृथिवीमंतरिक्षं दिवं
च ताभ्यां वस्त्रवासोभ्यामतितराणि मस्यामिति यजमानः ब्राह्मणाय इमे वो वस्त्रवाससी अ
हिंसंतः प्रतिगृह्णीध्वमिति ददाति॥ देवस्य त्वा॰ राजा त्वा व॰ रूद्राय गां सोमाय वासस्तेनामृ॰
क इदं कस्मा॰ हविःशेषानुद्वास्येत्यादि वसुर्यज्ञो॰ परमेश्वरप्रसादो मभागच्छतु इत्यंतं कृत्वा
भद्रान्नः श्रेयः समनेष्ट देवास्त्वयावसेन समसीमहि त्वा॥ सनो मयोभूः पितवाविशस्व
तुष्पदे ५ शंनो भव द्विपदे शं च इति मंत्रेण यजमानः स्वभागं प्राश्नाति॥ अग्निः प्रथमः प्राश्नातु
सहि वेद यथा हविः॥ शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः इति मंत्रेण श्यामाकभागं
प्राश्नाति॥ अंभसिस्त्वणी हि परिश्येहीत्यादि उपवेषोप॰ ध्रुवानयनपर्यंतं कुर्यादित्यंतं कृत्वा॥ कपा
वि लमोचनकाले यद्धर्मे कपालमुपचिन्वंति वेधसः॥ पूष्णस्तदप्यव्रतं इंद्रवायू॰ ताभिस्सेके
कपालमुद्वास्य॥ ततो ब्रह्मभागप्राशनादि यज्ञतंत्रं च समवर्ज ब्राह्मणतर्पणांतं प्रकृतिवत्॥ ७॥

इत्याग्रयणंसमाप्तं ॥ ॥अथाग्रयणहौत्रंलिख्यते ॥ नमःप्रवक्त्रइत्यादि० शोचिष्केशस्तमीमहेमृप
थुपाजाअमर्त्योघृतनिर्णिक्स्वाहुतः । अग्निर्यज्ञस्यहव्यवोम् तंसबाधोयतःस्रुचइत्थाधियायज्ञ
वंतः । आचक्रुरग्निमूतयोम् समिद्धोअग्नआहुतेत्यादि० ॥ आवाहने ॥ अग्निमग्नआवहसोम
मावहअग्निमावहइंद्राग्नीआवहविश्वान्देवानावहसोममावहद्यावापृथिवीआवहदेवाँआ
ज्यपामित्यादि ॥ उत्तमेप्रयाजे । येयजामहेस्वाहाग्निंस्वाहासोमंस्वाहाग्निंस्वाहेंद्राग्नीस्वा
हाविश्वान्देवान्स्वाहासोमंस्वाहाद्यावापृथिवीस्वाहादेवाआज्यपामित्यादि० ॥ वार्त्रघ्नावाज्य
भागौ । केचिद्वृधन्वंतौविदधति ॥ प्रधानस्य । अग्निर्मूर्द्धा० भुवोयज्ञस्य० । प्रकृतिवदिंद्राग्नी ॥
विश्वेदेवासआगतश्रृणुतामइमंहवं ॥ एदंबर्हिर्निषीदतोम् ॥ येयजामहेविश्वान्देवान्
येकेचज्मामहिनोअहिमायादिवोजज्ञिरेअपांसधस्थे । तेअस्मभ्यमिषयेविश्वमायुःक्षपउ
स्रावरिवस्यंतुदेवावौषट् ॥ सोमयास्तेमयोभुवऊतयःसंतिदाशुषे । ताभिर्नोविताभवोम् ।
येयजामहेसोमंयातेधामानिदिवियापृथिव्यांयापर्वतेष्वोषधीष्वप्सु । तेभिर्नोविश्वैःसु
मनाअहेळन्राजन्सोमप्रतिहव्यागृभायावौषट् ॥ महीद्यौःपृथिवी० भरीमाभिःॐम् ॥

येयजामहेद्यावापृथिवीप्रपूर्वजेपितरानव्यसीभिर्गीर्भिःकृणुध्वंसदनेऋतस्य।आनो
द्यावापृथिवीदैव्येनजनेनयातंमहिवांवरूथंवौषट्॥अथस्विष्टकृतं॥प्रेद्धोअग्नेदीदि
हिपुरोनोजस्रयासूर्म्यायविष्ठ।त्वांशश्वंतउपयंतिवाजोम्॥येयजामहेअग्निंस्विष्ट
कृतं·विश्वेषांदेवानांप्रियाधामान्ययाट्सोमस्यप्रियाधामान्ययाट्द्यावापृथिव्योःप्रिया
धामान्ययाट्देवानामाज्यपानां·जुषतांहविरिमोअग्नेवीततमानिहव्याजस्रोवक्षिदेवताति
मच्छ।प्रतिनईंसुरभीणिव्यंतुवौषट्॥इलाभक्षणेविशेषः॥अवांतरेलाभक्षणंजमु मंत्रं
अवांतरेलांसव्येपाणौकृत्वादक्षिणपाणिनाभिमृशेत्।प्रजापतेसागृहंगच्छामिमहंत्रे
येमस्वंपश्यसेमस्यमन्ताप्याय।भद्रान्नःश्रेयःसमनैष्टदेवास्त्वयावशेनसमशीमहित्वा।
सनोमयोभूःपितवाविशस्वशन्तोभवद्विपदेशंचतुष्पदे।अनेनमाहरपानमस्यतास्मिन्ने
वदेशोस्थितोनाभिमाल[illegible]भेत।अमोसिप्राणतदृतंब्रवीम्यमासिसर्वानसिप्रविष्टः। उ
समेजरांरोगमपनुद्यशरीराद्मामएधिमामृथामहेंद्र॥सूक्तवाके।अग्निरिदंहवि·
सोमइदं·अग्निरिदं·इंद्राग्नीइदं·विश्वेदेवाइदंहविरजुषंतावीवृधंतमहोज्यायोक्रत॥
सोमइदंहवि·द्यावापृथिवीइदं·रजुषेतांमवीवृधेतां·देवाआज्यपा·संस्थाजपांतं॥इतिहौत्रं।

K K S U LIBRARY
RAMTEK
441 106
M1016
Dist. Nagpur

9

```
[OrderDescription]
,CREATED=17.10.20 13:04
,TRANSFERRED=2020/10/17 at 13:05:45
,PAGES=9
,TYPE=STD
,NAME=S0004084
,Book Name=M-1016-AGRAYAN PRAYOG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,
```